दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-115

1

फरवरी 15, 2026

Website- www.himsanskritam.com

Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णत्रयोदशी
फाल्गुण 03 प्रविष्टांशः मङ्गलमयः भवेत्

2 मन्त्रिमण्डलेन लक्षात्मक-कोटि रूप्यकात्मक नगरीय चैलेंज फण्ड इति देयराशिः अनुमोदनं कृतम्

3 अन्ताराष्ट्रीय-शिवरात्रि-महोत्सवे भागं ग्रहीतुं मण्डीनगरं प्राप्तवान् 'बड़ा देव कमरूनागः', राज-माधोरायेन सह अभवत् भव्यं मिलनम्

5 जयजलाराम-आयुर्वेद-महाविद्यालये, शिवपुरी-गोधरा-नगरे महाशिवरात्रि-महोत्सवस्य भव्य-आयोजनम्

## प्रधानमन्त्रिणा नरेन्द्रमोदिना असम-राज्ये सार्द्ध चतुःपञ्चाशत् कोटिरूप्यकाणाम् अनेकसां विकासपरियोजनानां उद्घाटनम्, हरित-ध्वज-प्रदर्शनं च कृतम्





**हिमसंस्कृतवार्ताः -** प्रधानमन्त्रिणा नरेन्द्रमोदिना असम-राज्ये सार्द्ध चतुःपञ्चाशत् कोटिरूप्यकाणां अनेकसां विकासपरियोजनानां उद्घाटनम्, हरित-ध्वज-प्रदर्शनं च कृतम्। गुवाहाटी-नगरे, सः त्रिसहस्र कोटि-रूप्यकाणां व्ययेन निर्मितस्य गुवाहाटी-उत्तर-गुवाहाटी-नगरयोः मध्ये सम्पर्क संवर्धनाय ब्रह्मपुत्रानद्याः उपरि कुमारभास्करवर्मा-सेतोः उद्घाटनम् अकरोत्। सेतोः उद्घाटनानन्तरं, प्रधानमन्त्री समीपस्थे क्षेत्रे लचित-घट्टे गत्वा आई. आई. एम-गुवाहाटी इत्यस्य अस्थायी-परिसरस्य, कामरूप-जनपदस्य अमिङगांवे पूर्वोत्तर क्षेत्रस्य राष्ट्रिय-दत्तांश-केन्द्रस्य च आभासीय माध्यमेन उद्घाटनम् अकरोत्। भारतस्य चतुर्णां नगराणां कृते पी. एम. ई-बस-सेवा-योजनान्तर्गतं सपाद-द्विशत विद्युत्-बस-यानानि अपि प्रधानमन्त्रिणा ध्वजप्रदर्शनं कृत्वा उद्घाटितानि। येषु गुवाहाटी-नगरं प्रति शतानि, नागपुर-भावनगरयोः प्रति पञ्चाशत्, चण्डीगढ-नगरं प्रति पञ्चविंशति बस-यानानि च सम्मिलितानि सन्ति। इतः पूर्वम्, प्रधानमन्त्री, डिब्रूगढ-मण्डले राष्ट्रिय राजमार्गस्य समीपे विकसितस्य मोरन-बाईपास-इत्यत्र आपत्कालीन अवतरण-सौकर्यस्य उद्घाटनम् अकरोत्, यत्र योधृ-विमानानां, परिवहन-विमानानां, उदग्र-विमानानां च वायु-प्रदर्शनम् अभवत्। एतत् आपत्-अवतरण-सौविध्यं शत-कोटि-रूप्यकाणां व्ययेन निर्मितास्ति। राज्यस्य एकदिवसीय-यात्रायां प्रधानमन्त्री पश्चात् गुवाहाटी-नगरे बूथ-विजय-सङ्कल्प-सभाम् अभिसंबोधितवान्। सः अवदत् यत् असम-राज्यं समेत्य समग्र पूर्वोत्तर क्षेत्रं भारतस्य अष्टलक्ष्मीति अस्ति। प्रधानमन्त्री अवदत् यत् विगतेषु एकादश-वर्षेषु भाजपेति दलस्य नेतृत्वे एन. डी. ए-सर्वकारः पूर्वोत्तरक्षेत्रस्य विकासाय महत्त्वपूर्णां भूमिकां निरवहत्। सः काङ्ग्रेस-दलस्य शासनावधौ अस्य प्रदेशस्य अवहेलनं अविकसितं चेति निन्दितवान्। सः अवदत् यत् गत एकादश वर्षेषु पूर्वोत्तरस्य कृते पञ्च-दशमलवोत्तर-पञ्च-लक्ष-कोटिरूप्यकाणि विनियोजितानि। प्रधानमन्त्री सूचितवान् यत् तस्य सर्वकारः अस्मिन् क्षेत्रे सम्पर्क, मूलसौकर्यादि च क्षेत्राणां परिष्काराय कार्यं कुर्वन् अस्ति एतेन यूनां कृते वृत्यावसराणां सृजनं भविष्यति।

## अमरीकादेशस्य राष्ट्रपतिः डॉनल्ड ट्रम्पः विश्वस्य बृहत्तम-विमानवाहक-नौकां पश्चिम एशिया-प्रदेशं प्रति प्रेषयति।

**हिमसंस्कृतवार्ताः -** अमरीकादेशस्य राष्ट्रपतिः डॉनल्ड ट्रम्पः विश्वस्य बृहत्तम-विमानवाहक-नौकायाः 'यू-एस्-एस्-जेराल्ड-आर.फोई' इत्यस्य मध्यपूर्व-प्रदेशं प्रति प्रेषणं अनुमोदितम्। एषा नौका कैरेबियन सागरात् प्रेषिता अस्ति। विमानवाहनक-नौकायाः विनियोजनं तदा अभवत् यदा ईरानदेशेन सह वार्तालापस्य द्वितीय-चरणः प्रस्तावितः आसीत्। अन्यत्र ईरानदेशे जनाः तेहरान नगरे गतमासे संजातेषु रक्तरञ्जित-घटनासु मृतकानां कृते चत्वारिंशत् दिवसीयं शोक-समारोहं कुर्वन्ति।

## प्रत्येकं कार्यक्षेत्रं महिलाभ्यः सुरक्षितं कृत्वा ताभ्यः समान-वृत्त्यावसरान् प्रदानं सर्वकारस्य लक्ष्यम् -अन्नपूर्णा देवी

**हिमसंस्कृतवार्ताः -** केन्द्रीय-महिला-बाल-विकास-मन्त्री अन्नपूर्णा देवी अवदत् यत् सर्वकारस्य लक्ष्यम् अस्ति यत् प्रत्येकं कार्यक्षेत्रं महिलाभ्यः सुरक्षितं कृत्वा ताभ्यः समान-वृत्त्यावसरान् प्रदानम्। नवदिल्ली-नगरे कार्यस्थले महिलानां सुरक्षायाः विषये राष्ट्रियसम्मेलनं सम्बोधयन्ती मन्त्री अवदत् यत् शी-बाक्स्-पोर्टल् इत्यनेन महिलानां कृते कार्यस्थले स्व-निवेदनानां पञ्जीकरणं सुलभतरं जातम् अस्ति। मन्त्रिणा उक्तं यत् अनेकानि कार्यस्थलानि अस्मिन् केन्द्रीकृत-पटले पञ्जीकृतानि सन्ति। मन्त्रिणा उज्ज्वला-मुद्रादि योजनानां महिला-कल्याण-योजनानां च प्रशंसापि कृता।

## नूतन-दिल्ली-वाराणसी-नगरयोः प्रति विशिष्ट-आरक्षित-रेलयानानां संचालनम् उद्घोषितं रेलमंत्रालयेन।



**हिमसंस्कृतवार्ताः -** होली पर्वणि सुगमं निर्विघ्नं च यात्रां सुनिश्चेतुं जम्मू-रेल-मण्डलेन श्रीमाता वैष्णोदेवी कटरा-स्थानकात् नूतन-दिल्ली-वाराणसी-नगरयोः प्रति विशिष्ट-आरक्षित-रेलयानानां संचालनम् उद्घोषित्। एतानि रेलयानानि फरवरी मासे संचालितानि भविष्यन्ति अद्य च मार्गे प्रमुख स्थानकेषु विरमिष्यन्ति। एतेषु जम्मू-कश्मीर, पञ्जाब, हरियाणा, उत्तरप्रदेश, राज्यानां यात्रिणः लाभान्विताः भविष्यन्ति।

## पुलवामा-आतङ्की-आक्रमणे हुतात्मभ्यः वीरेभ्यः राष्ट्रस्य श्रद्धाञ्जलिः




**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः।** भारतस्य उपराष्ट्रपतिः सी.पी. राधाकृष्णन प्रधानमन्त्री नरेन्द्रमोदी च २०१९ तमे वर्षे पुलवामा-आतङ्की-आक्रमणे वीरगतिं प्राप्तवद्भिः बलिदानी-सैनिकेभ्यः स्वश्रद्धाञ्जलिं समर्पितवन्तौ। उपराष्ट्रपतिः: सामाजिक-माध्यमेन (Social Media) उक्तवान् यत् सुरक्षाकर्मिणां सर्वोच्चबलिदानं सदैव स्मरिष्यते। एतत् प्रत्येकं नागरिकं सशक्तस्य सुरक्षितस्य च भारतस्य निर्माणाय निरन्तरं प्रेरयिष्यति। प्रधानमन्त्रिणा कथितं यत् राष्ट्रं प्रति शहीद-सैनिकानां निष्ठा, सङ्कल्पः, सेवा च देशवासिनां सामूहिक-चेतनायां सदैव जीविष्यति। सः अवदत् यत् प्रत्येकः भारतीयः तेषाम् अदम्यसाहसात् प्रेरणां शक्तिं च प्राप्नोति। विदेशमन्त्री डॉ. एस. जयशंकरः अपि स्वश्रद्धाञ्जलिं प्रदाय उक्तवान् यत् एतेषां वीराणां बलिदानम् 'सीमापार-आतङ्कवादं प्रति शून्य-सहनशीलता' (Zero Tolerance) इति नीतिं अधिकां सुदृढां करोति। तेषां राष्ट्रसेवा अदम्यसाहसश्च अस्माकं सर्वेषां प्रेरणास्रोतः अस्ति।"

## सुभाषितम्

**सदैकत्वं न भेदोऽस्ति,**
**सर्वथैव ममास्य च।**
**योऽसौ साहमहं यासौ,**
**भेदोऽस्ति मतिविभ्रमात्।।**

मैं और ब्रह्म एक ही हैं। मुझमें और इस ब्रह्म में किञ्चिन्मात्र भी भेद नहीं है। जो ब्रह्म हैं, वही मैं भी हूँ और जो मैं हूँ वही वे हैं। केवल बुद्धि के भ्रम से भेद प्रतीत होता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## आर्थिक-कार्य-मन्त्रिमण्डल-समित्या त्रि-बहुपथ-रेल-परियोजनानां चतु-राज्यानां द्वादश-जनपदेषु अनुमोदितम्



**हिमसंस्कृतवार्ताः -** आर्थिक-कार्य-मन्त्रिमण्डल-समित्या गतदिने त्रि-बहुपथ-रेल-परियोजनानां अनुमोदनं कृतम्। एताः परियोजनाः दिल्ली-हरियाणा-महाराष्ट्र-कर्णाटक राज्येषु स्थितेषु द्वादश-जनपदेषु विस्तृताः सन्ति। अनेन भारतीय रेल-अन्तर्जालस्य प्रायः ऊन-नवत्युत्तर-त्रिशत्-किलोमीटर-पर्यन्तं विस्तारो भविष्यति। एतासां परियोजनानां भावि-आकलनं प्रायः नवत्युत्तर-पञ्चशताधि-अष्टादश कोटि-रूप्यकाणि अस्ति। एताः परियोजनाः प्रायः त्रिशोत्तर-द्विसहस्रतम वर्षपर्यन्तं पूर्णाः भविष्यन्ति।

# मन्त्रिमण्डलेन लक्षात्मक-कोटि रूप्यकात्मक नगरीय चैलेंज फण्ड इति देयराशिः अनुमोदनं कृतम्




**हिमसंस्कृतवार्ताः -** सूचना-प्रसारण मन्त्री अश्विनी वैष्णवः भणितवान् यत् अन्तिमं मन्त्रिमण्डल-समागमं साउथ-ब्लॉक-भवने अभवत्। नवदेहल्यां वार्ताहरैः सह वार्तालापं कुर्वन् असौ उक्तवान् यत् आगामिनः मन्त्रिमण्डल-समागमाः 'सेवा-तीर्थे' भविष्यन्ति। तेन उक्तं यत् अस्मिन् विषये एकः प्रस्तावः अपि पारितः, साउथ-ब्लॉक-नॉर्थ-ब्लॉक इत्येते भवने ब्रिटिश-शासकैः विनिर्मितानि आसन्। मन्त्रिमण्डल-समित्या 'अर्बन-चैजेंज-फण्ड' नाम देयराशेः अनुमोदनम् अपि विहितम्। यस्य कृते केन्द्रेण लक्षात्मक-कोटि रूप्यकाणि अनुमोदितानि । एतेन केन्द्रं परियोजनायाः व्ययं पञ्चविंशतिः प्रतिष्ठानं संवहिष्यति, अवशिष्टं व्ययं विपणीषु संग्रहीष्यति। अनेन आगामिषु पञ्चवर्षेषु नगरीय-क्षेत्रे चतुर्लक्षात्मक-कोटि-रूप्यकाणां निवेशः अनुमीयते। भारतस्य विवर्धित-स्टार्टअप-पर्यावरणस्य एतस्य प्रोत्साहनार्थं केन्द्रीय-मन्त्रिमण्डलेन स्टार्टअप इंडिया-फण्ड-ऑफ-फण्ड्स-इत्यस्य द्वितीय चरणस्य स्थापना अपि अनुमोदिता। यस्य निवेशः आहत्य दश-सहस्र-कोटि-रूप्यकात्मकः भविष्यति। येन स्टार्टअप क्षेत्रं भारतस्य निवेश-धन-संग्रहः सुलभे भविष्यति। दूरसञ्चार -विकास-केन्द्रम् (सी-डीओटी) इत्यनेन 'सिनर्जी-क्वांटम् इंडिया प्राइवेट लिमिटेड' इत्यनेन सहयोगः सन्धिः हस्ताक्षरितः।

# सम्पूर्णे देशे मान्यते शिवरात्रिमहोत्सवः



अद्य सम्पूर्णे देशे महाशिवरात्रि-पर्व श्रद्धया आध्यात्मिक-उत्साहेन च मानयन्तः सन्ति। भगवान् शिवस्य भक्तानां कृते अत्यन्तं पवित्रं मन्यमाने अस्मिन् दिने उपवासः, विशेषप्रार्थनाः, मन्दिरेषु च रात्रौ पूजा-अर्चनं क्रियते। सहस्रशः भक्ताः शान्ति-समृद्धयोः आशीर्वादं प्राप्तुं तीर्थस्थलेषु स्नानं कुर्वन्ति।

महाशिवरात्रि-महात्म्यम्

महाशिवरात्रिः केवलं किञ्चित् पर्व नास्ति, अपितु इयं आध्यात्मिक-चेतनायाः आत्मसाक्षात्कारस्य च महापर्व वर्तते। हिन्दू-पञ्चाङ्गानुसारं फाल्गुनमासस्य कृष्णपक्षस्य चतुर्दश्यां तिथौ इदं पर्व मान्यते।

## १. आध्यात्मिकं महात्म्यम्

शास्त्रानुसारं महाशिवरात्रिः सा रात्रिः अस्ति यदा शिवस्य (पुरुषस्य) शक्त्या (प्रकृत्या) सह मिलनं अभवत्। आध्यात्मिकदृष्ट्या इयं 'अन्धकारात् प्रकाशं प्रति, अज्ञानात् ज्ञानं प्रति' विजयस्य प्रतीकं मन्यते।

**शिव-पार्वती विवाहः:** जनश्रुत्यानुसारम् अस्मिन्नेव दिने भगवान् शिवः माता पार्वती च परिणयसूत्रे बद्धौ अभवताम्, यत् गृहस्थजीवनस्य त्यागस्य च सन्तुलनं दर्शयति।

**लिङ्गोद्भवः:** पौराणिककथानुसारं अस्मिन् दिने भगवान् शिवः प्रथमवारं ज्योतिर्लिङ्गरूपेण प्रकटितः अभवत्, यस्य आदिः अन्तः च नास्ति।

## २. पूजायाः चत्वारः प्रहराः विधिः च

महाशिवरात्रौ रात्रौ चतुर्षु प्रहरेषु पूजायाः विशेषविधानं वर्तते। भक्तानां विश्वासः अस्ति यत् अस्मिन् दिने कृतं उपवासं जागरणं च जन्म-मरण-बन्धनात् मुक्तिं ददाति।

प्रहरः समयः अभिषेक-सामग्री फलम्
प्रथम प्रहरः ६ - ९ (सायम्) दुग्धम् आरोग्यं दीर्घायुः च
द्वितीय प्रहरः ९ - १२ (रात्रौ) दधि सुखं समृद्धिः च
तृतीय प्रहरः १२ - ३ (रात्रौ) घृतम् ज्ञानं वैराग्यं च
चतुर्थ प्रहरः ३ - ६ (प्रातः) मधु (क्षौद्रम्) मोक्षप्राप्तिः

## ३. अभिषेकस्य विज्ञानं बिल्वपत्रं च

शिवलिङ्गे जल-दुग्ध-बिल्वपत्राणां अर्पणस्य पृष्ठे गभीरः प्रतीकात्मकः अर्थः अस्तिः

**अभिषेकः:** शिवः 'रुद्रः' कथ्यते, यः अग्नेः प्रतीकः अस्ति। शीतलजलेन दुग्धेन च अभिषेकः अस्माकं मनसः अशान्तिं क्रोधं च शमयति।

**बिल्वपत्रम्:** बिल्वपत्रस्य त्रीणि दलानि सत्-रज-तम-गुणानां अथवा शिवस्य त्रिनेत्राणां प्रतिनिधित्वं कुर्वन्ति।

## ४. प्रमुखाणि तीर्थानि ज्योतिर्लिङ्गानि च

अस्मिन् दिने भारतस्य द्वादश-ज्योतिर्लिङ्गेषु विशेषोत्सवः भवति। सोमनाथ-महाकालेश्वर-काशीविश्वनाथ-केदारनाथादिषु धामसु लक्षाधिकशः भक्ताः आगच्छन्ति। उज्जयिन्यां भगवतः महाकालस्य 'भस्म-आरार्तिक्यं' (भस्म आरती) विशेषं आकर्षणं भवति।

"ॐ नमः शिवाय" — अस्मिन् रात्रौ अस्य पञ्चाक्षरीमन्त्रस्य जपः अनन्तगुणं फलं ददाति।

# मार्गदुर्घटनाग्रस्तानां कृते 'प्रधानमन्त्री-राहत-योजना' अङ्गीकृता

प्रधानमन्त्री नरेन्द्रमोदी मार्गदुर्घटनासु क्षतानां चिकित्सालये प्रवेशं चिकित्सायाः प्रतिबद्धतां च दातुं 'पीएम राहत योजना' (प्रधानमन्त्री-राहत-योजना) इत्यस्य अनुमोदनं कृतवान्। अस्यां योजनायां मार्गे कस्यापि प्रकारस्य दुर्घटनायाः स्थितौ सप्तदिनानां यावत् चिकित्सायाः कृते १.५ लक्षरूप्यकाणां पर्यन्तं 'नकद-रहित' (Cashless) चिकित्साव्ययं सर्वकारः वक्ष्यति।

सडक-परिवहन-राजमार्ग-मन्त्रालयस्य अनुसारं अनया योजनया इदं सुनिश्चितं भविष्यति यत् मार्गदुर्घटनायाः अनन्तरं शीघ्रं चिकित्सायाः अभावात् कस्यापि प्राणहानिः न भवेत्। मन्त्रालयस्य अनुसारं, सर्वकारः चिकित्सालयेभ्यः 'मोटर-वाहन-दुर्घटना-कोषात्' भुगतानं करिष्यति। देशे प्रतिवर्षं मार्गदुर्घटनासु चिकित्सायाः अभावात् बहूनां जनानां मृत्युः भवति, या इदानीं न्यूनीभविष्यति।



# आर्टिफीशियल इन्टेलिजेन्स (AI) पञ्चम-औद्योगिकक्रान्तेः आधारः भविष्यति - अश्विनी वैष्णवः

**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।**

केन्द्रीय-इलेक्ट्रॉनिक्स-सूचनाप्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः उक्तवान् यत् कृत्रिमप्रज्ञा (AI) पञ्चम-औद्योगिकक्रान्तिं शक्तिं प्रदास्यति। अस्यां प्रक्रियां समाजे प्रभावे, अङ्गीकरणे, शासने च मुख्यतया ध्यानं केन्द्रीकृतं भविष्यति।

**AI शिखरसम्मेलनम्** - मन्त्रिणा वैष्णवेन घोषितं यत् भारतं अस्मिन् वर्षे विश्वस्य विशालतमस्य 'आर्टिफीशियल इन्टेलिजेन्स' शिखरसम्मेलनस्य आतिथ्यं करिष्यति। एतत् आगामि-वंशस्य प्रौद्योगिक्यां भारतस्य वर्धमानं प्रभावं दर्शयति।

**बुलेट-ट्रेन सेवा** - सः सूचितवान् यत् मुम्बई-अहमदाबाद बुलेट-ट्रेन सेवा आगामि-वर्षे आरप्स्यते।**सेमीकण्डक्टर क्षेत्रम्** - मन्त्रिणा बलपूर्वकं कथितं यत् अद्य विश्वस्य सर्वाः प्रमुखाः 'सेमीकण्डक्टर' संस्थाः भारते एव स्वकीयानां अत्याधुनिक-चिप्स (chips) इत्येतेषां परिकल्पनां (design) कुर्वन्ति ।

अश्विनी वैष्णवः उद्योगजगत्, छात्रान्, समाजं च आर्टिफीशियल इन्टेलिजेन्स (AI) क्रान्तये सज्जं भवितुम् आहूतवान्। सः अवदत् यत् एषा प्रौद्योगिकी भविष्यस्य विकासस्य मुख्यधारा भविष्यति।

# सेनाप्रमुखस्य जनरल-उपेंद्र-द्विवेदी-महोदयस्य चतुर्दिवसीया आस्ट्रेलिया-यात्रा

सेनाप्रमुखः जनरल-उपेंद्र-द्विवेदी १६ फरवरी दिनाङ्के चतुर्दिवसीयायै आस्ट्रेलिया-यात्रायै गमिष्यति। रक्षा-मन्त्रालयेन सूचितं यत् अस्याः यात्रायाः उद्देश्यं भारत-आस्ट्रेलिया-रक्षासहयोगं प्रगाढं करणं तथा च द्वयोः देशयोः मध्ये वर्धमानं तालमेलं सुदृढं करणं वर्तते।सेनाप्रमुखः आस्ट्रेलिया-रक्षाबलानां वरिष्ठ-अधिकारिभिः सह व्यापिकां वार्तां करिष्यति। अस्य मुख्यमुद्देश्यं प्रशिक्षणं, संयुक्त-अभ्यासः, वृत्तिक-आदान-प्रदानं (Professional exchange) तथा क्षमता-निर्माणं सहितं सैन्य-गतिविधिषु वृद्धिः अस्ति।

# बैडमिंटन प्रतियोगितायां प्रमोद भगतेन चतुर्थवारं विश्व-श्रृंखलायां एकल-स्वर्ण-पदकं विजितम्



**हिमसंस्कृतवार्ताः -** बैडमिंटन प्रतियोगितायां भारतीय बैडमिंटन पैरा-क्रीडकः प्रमोद-भगतः बीडब्ल्यूएफ पैरा-वर्ल्ड चैम्पियनशिप-प्रतियोगितां पुरुष- एसएल-वर्गे स्वर्ण पदकमधिमतम्। तेन निर्णायक-द्वन्द्वे इण्डोनेशियायाः मोहम्मद-अल-इमरान इत्यमुं पराभूय पदकं इदं अर्जितम्। प्रतियोगितेयं बेहरीन-नगरे समायोजितम् सप्त-त्रिंशत् वर्षीय प्रमोद भगतेन चतुर्थवारं विश्व-श्रृंखलायां एकल-स्वर्ण-पदकं विजितम्।

# अन्ताराष्ट्रीय-शिवरात्रि-महोत्सवे भागं ग्रहीतुं मण्डीनगरं

## प्राप्तवान् 'बड़ा देव कमरूनागः', राज-माधोरायेन सह अभवत् भव्यं मिलनम्






**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।** अन्ताराष्ट्रीय- शिवरात्रि- महोत्सव-२०२६ मध्ये भागं ग्रहीतुं मण्डी-जनपदस्य आराध्यदेवः 'बड़ा देव कमरूनागः' शनिवासरे मण्डीनगरं प्राप्तवान्। तस्य आगमनेन सहैव महोत्सवस्य पारम्परिकाणि कार्याणि विधिवत् आरब्धानि सन्ति।राज-माधोराय मन्दिरे जिलाधीशः तथा शिवरात्रि- महोत्सव- समित्याः अध्यक्षः अपूर्व देवगनः बड़ा- देव- कमरूनागस्य विधिवत् स्वागतं कृतवान् पूजा- अर्चनां च सम्पादितवान्। अस्मिन् अवसरे बड़ा- देव- कमरूनागस्य राजमाधोरायेन सह भव्यं मिलनम् अपि अभवत्। बड़ा- देव- कमरूनागः अधुना आगामि-सप्तदिनानि यावत् टारना- माता- मन्दिरे विराजमानः भविष्यति भक्तजनेभ्यः च आशीर्वादं दास्यति। जिलाधीशः अपूर्व देवगनः अवदत् यत् बड़ा-देव-कमरूनागस्य आगमनेन सहैव पारम्परिक-धार्मिक-अनुष्ठानानां आरम्भः भवति। अन्येषां देवी-देवतानाम् आगमनम् अपि प्रारब्धम् अस्ति। सः विश्वासं प्रकटितवान् यत् देवी- देवतानाम् आशीर्वादेन महोत्सवः सफलतापूर्वकं सम्पन्नः भविष्यति।

जिलाधीशेन सूचितं यत् अस्मिन् वर्षे अन्ताराष्ट्रीय- शिवरात्रि-महोत्सवः १६ फरवरीतः २२ फरवरी पर्यन्तं आयोजितः भविष्यति। अस्मिन् जनपदात् २१६ देवी- देवताः निमन्त्रिताः सन्ति। मण्डल- प्रशासनेन महोत्सवं आकर्षकं कर्तुं व्यापकाः सज्जाः कृताः सन्ति। सः जनसामान्यान् महोत्सवे भागं गृहीत्वा देवी-देवतानाम् आशीर्वादं प्राप्तुं आग्रहं कृतवान्। एतस्मात् पूर्वं 'अन्तर्राष्ट्रीय- शिवरात्रि- मेला-समित्या' सङ्घटितेन स्वागतसमूहेन 'पुलघराट' इति स्थाने बड़ा-देव-कमरूनागस्य पारम्परिकरीति-नीतिभिः स्वागतं कृतम्। अस्मिन् अवसरे 'सर्व देवता समिति' इत्यस्य अध्यक्षः शिव पाल शर्मा, मण्डल- राजस्व- अधिकारी हरीश कुमारः तथा अन्ये गण्यमान्याः पुरुषाः उपस्थिताः आसन्।

# मुख्यमन्त्री सुक्खु उक्तवान्- आर्द्रके अपि समर्थनमूल्यं प्रदास्यति सर्वकारः; सराहां- चण्डीगढ़- मार्गः द्वि-वीथिकः भविष्यति



**हिमसंस्कृतवार्ताः- सिरमौरम्।** सिरमौर- जनपदस्य सराहांक्षेत्रे एकां जनसभां सम्बोधयन् मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः अवदत् यत् राज्यसर्वकारः ग्रामीण- अर्थव्यवस्थां सुदृढां कर्तुं निरन्तरं प्रयत्नशीलः अस्ति। सः घोषितवान् यत् सर्वकारः दुग्धे समर्थनमूल्यं ददाति, अधुना आर्द्रके (अदरक) अपि न्यूनतम-समर्थनमूल्यं प्रदास्यते।

मुख्यमन्त्री स्वीये प्रवासे क्षेत्रीय-विकासस्य घोषणाः कृतवान्। सः अघोषयत् यत् सराहां- चिकित्सालये एकवर्षस्य अन्तः विशेषज्ञवैद्यानां नियुक्तिः भविष्यति। अल्ट्रासाउण्ड-यन्त्रं स्थापयिष्यते। सराहांनगरे सीबीएसई (CBSE) विद्यालयः उद्घाटयिष्यते। सराहां-चण्डीगढ़-मार्गः द्विवीथिकः (Double Lane) करिष्यते। सः काङ्ग्रेस-नेत्रीं दयालप्यारीं तथा पूर्व- विधानसभाध्यक्षं गङ्गू राम मुसाफिरं च प्रति तेषां अभ्यर्थनानां पूर्तये आश्वासितवान्।

**भाजपा-पक्षं प्रति प्रहारः आरडीजी-विषयश्च**

मुख्यमन्त्री भाजपा-नेतृभ्यः प्रश्नं कृतवान् यत् ते हिमाचलप्रदेशाय राजस्व-हानि-अनुदानं (RDG) प्राप्तुं पक्षे सन्ति वा न वा। सः अवदत् यत् १० सहस्रकोटिरूप्यकाणां कर्तनं हिमाचलस्य अधिकारस्य हननम् अस्ति, एषा कापि भिक्षा (खैरात) नास्ति। पूर्वतन-भाजपा-सर्वकारस्य कुप्रबन्धनेन राज्यस्य उपरि ७६,००० कोटिरूप्यकाणाम् ऋणं जातम्। ते केवलं मित्राणां सन्तोषाय अट्टालिकानां निर्माणे धनं व्ययितवन्तः।

ओपीएस अर्थात् पुरातन-वृत्ति-योजनां (OPS) स्थगयितुं केन्द्रतः प्रभावः अस्ति, परन्तु प्रदेशसर्वकारः कदापि न नमिष्यति।

# कांग्रेस-सर्वकारेण हिमाचलप्रदेशः अनिश्चितततायाः काले स्थापितः- विपक्षनेता जयराम ठाकुरः



**हिमसंस्कृतवार्ताः- ज्वालाजी ।**पूर्वमुख्यमन्त्री जयरामठाकुरः शनिवासरे ज्वालाजी शक्तिपीठे शिरसा नतम् अकरोत्। तत्र मन्दिरस्य पुजारी सौरभशर्मा नामक तेषां विधिवत् पूजां कारितवान्। पूर्वमुख्यमन्त्री मोदीभवने, योगिनीकुण्डे, शयनभवने अपि पूजाऽर्चनां कृतवान्। सः ज्वालामुख्यां आयोजिते विशाल- दंगलमेले सहभागित्वाय आगतः आसीत्।पत्रकारैः सह संवादे जयरामठाकुर उक्तवान् यत् वर्तमान- कांग्रेस- सर्वकारेण हिमाचलप्रदेशः पूर्णतया अनिश्चितततायाः स्थितौ स्थापितः। तेन उक्तं यत् सर्वदलीय- सभायां प्रदेशस्य वित्तसचिवेन स्पष्टतया उक्तं यत् हिमाचलप्रदेशः आर्थिकसंकटेन पीड्यते। तस्य परिणामस्वरूपं अनुदानानि निरोद्धव्यानि भविष्यन्ति, कर्मचारिणां वेतनानि स्थगितानि भवितुम् अर्हन्ति, एरियर-राशयः स्थगिताः भविष्यन्ति, विकास-कार्येषु अपि अवरोधः सम्भवति।पूर्वमुख्यमन्त्री प्रश्नं कृतवान्- एकस्मिन् पक्षे अधिकृताः आर्थिक-संकटस्य उल्लेखं कुर्वन्ति, अपरस्मिन् पक्षे मुख्यमन्त्री इदं वदति यत् २०२७ तमे वर्षे हिमाचलप्रदेशः आत्मनिर्भरः भविष्यति, २०३२ पर्यन्तं च देशस्य समृद्धतमः राज्यः भविष्यति। एते वाक्ये परस्परं विरुद्धे स्तः इति तेन उक्तम्। तेन अपि उक्तं यत् मुख्यमन्त्री-पदे आरोहणात् आरभ्य प्रदेश-सर्वकारः सर्वेषु विषयेषु केन्द्र-सर्वकारं पूर्व-भाजपा- सर्वकारं च दोषयति। आरडीजी-निरोधस्य विषये सः अवदत् यत् एषः निर्णयः केवलं हिमाचले न, अपि तु देशस्य सप्तदशसु राज्येषु अपि कृतः। कांग्रेस-सर्वकाराय एतत् पूर्वमेव ज्ञातम् आसीत्, तथापि केन्द्र- सर्वकारस्य निन्दा अयुक्ता।तेन उक्तं यत् निर्वाचन-समये जनतायै याः गारण्ट्यः दत्ताः, ताः पूरयितुं प्रदेश- सर्वकारस्यैव उत्तरदायित्वम् अस्ति; केन्द्रसर्वकारेण तादृश्यः काचित् गारण्टी न दत्ता। आगामिनि विधानसभासत्रे अपि तेन प्रश्नः उत्थापितः- एतत् बजटसत्रं भविष्यति उत् विशेष-सत्रम् इति अद्यापि न स्पष्टम्।समग्रतया पूर्वमुख्यमन्त्री अवदत् यत् वर्तमान- कांग्रेस- सर्वकारस्य नीतिभिः प्रदेशस्य जनाः अद्य असमञ्जस- स्थितौ अनिश्चितततायाः काले च जीवन्ति।

# आर्थिकरूपेण हिमाचलस्य कण्ठरोधस्य प्रयासः"- हर्षवर्धनः

उद्योगमन्त्री हर्षवर्धन चौहानः अवदत् यत् गतेषु त्रिषु वर्षेषु राज्यसर्वकारेण राजनैतिक- आर्थिक- प्राकृतिक- आपदः सोढाः। सः आरोपं कृतवान् यत् १९५२ वर्षात् लभ्यमानं अनुदानं (RDG) स्थगितं कृत्वा हिमाचलस्य कण्ठरोधः क्रियते। सर्वदलीय-गोष्ठ्यां भाजपापक्षस्य व्यवहारः दुर्भाग्यपूर्णः आसीत्। तत्र तेषां दलीय- कलहः अपि स्पष्टः अभवत्।

**३२ कोटिरूप्यकाणां परियोजनानां लोकार्पणं शिलान्यासश्च**

मुख्यमन्त्रिणा सराहां-क्षेत्रे प्रायः ३२ कोटिरूप्यकाणां ७ विकासपरियोजनानां उद्घाटनं शिलान्यासश्च कृतः-

१. उद्घाटितानि कार्याणि: राजगढ़े सहायक- जिला- न्यायवादिनः कार्यालयः (१.४४ कोटिः), नोहरीनगरे उपतहसीलभवनं (१.९८ कोटिः), थानी- थामनी- खरीमू मार्गः (५.७४ कोटिः) तथा अन्याः पेयजल-योजनाः।

२. शिलान्यासः- गिरिनद्यां यानयोग्यः सेतुः (१४.१३ कोटिः) तथा राजगढ़-लोनिवि-वसतौ आवास- निर्माणम् (२.१५ कोटिः)।

# "सर्वकारः क्रीडामाध्यमेन यूनां प्रगत्यै प्रतिबद्धः अस्ति"- उपमुख्यमन्त्री मुकेश अग्निहोत्री



**हिमसंस्कृतवार्ताः- ऊना।** हरोली-क्षेत्रस्य बीटनग्रामे शहीदानां स्मृतौ आयोजितस्य ११ तमस्य 'बिग कॉस्को क्रिकेट कप २०२६' इत्यस्य शनिवासरे भव्यं भावनात्मकं च समापनं जातम्। समापनसमारोहे उपमुख्यमन्त्री मुकेश अग्निहोत्री महोदयः मुख्यतिथिरूपेण उपस्थितः भूत्वा क्रीडासुविधानां विस्तारस्य क्षेत्रीयविकासस्य च विषये महत्त्वपूर्णाः घोषणाः कृतवान्। स्वकीयसम्बोधने सः अवदत् यत् प्रदेशसर्वकारः यूनां क्रीडामाध्यमेन अग्रे नेतुं प्रतिबद्धः वर्तते। बीटन-क्रीडाङ्गणस्य विकासकार्याय १.५८ कोटिरूप्यकाणि व्ययितानि सन्ति। सः क्रीडाङ्गणं आधुनिकसुविधाभिः सुसज्जितं कर्तुं घोषणां कुर्वन् अहोरात्र- क्रीडास्पर्धानां (Day Night matches) आयोजनाय ५० लक्षरूप्यकाणि प्रदातुं उद्घोषणां कृतवान्। अनया राश्या क्रीडाङ्गणे 'हाई मास्ट' दीपाः (High mast lights) स्थापयिष्यन्ते, येन भविष्ये अत्र रात्रिकालीन-स्पर्धाः अपि सम्भवाः भविष्यन्ति। सः उक्तवान् यत् यथा 'खड्ड' फुटबॉल क्रीडाङ्गणे प्रायः ५० लक्षरूप्यकाणां व्ययेन अत्याधुनिक-प्रकाशव्यवस्था स्थापिता अस्ति, तथैव बीटन-क्रीडाङ्गणमपि विकसितं करिष्यते। उपमुख्यमन्त्री बीटन-क्रीडाङ्गणं यावत् दृढमार्गस्य (Pukka road) निर्माणस्य घोषणां अपि कृतवान्, येन क्रीडाकराणां दर्शकानां च कृते उत्तमं गमनागमनसौकर्यं प्राप्तं भवेत्।

**'कोटिद्वयेन तडागस्य, १.१४ कोटिरूप्यकैः**

## पञ्चायतभवनस्य निर्माणम्'

उपमुख्यमन्त्री सूचितवान् यत् बीटन-ग्रामे तडागस्य जीर्णोद्धाराय सौन्दर्यीकरणाय च २ कोटिरूप्यकाणि तथा पञ्चायतभवनस्य निर्माणाय १.१४ कोटिरूप्यकाणां राशिः प्रदत्ता अस्ति, शीघ्रमेव च निर्माणकार्यं प्रारप्स्यते। पञ्चायतभवनार्थं भूमिः पञ्चायतनाम्ना हस्तान्तरिता अस्ति। सः 'चौधरी स्पोर्ट्स क्लब बीटन' इत्यस्मै क्षेत्रवासिभ्यः च श्रेष्ठाय आयोजनाय अभिनन्दनं दत्तवान्। सः 'प्रो. सिम्मी अग्निहोत्री फाउण्डेशन' पक्षतः क्लब-इत्यस्मै (Club) १ लक्षरूप्यकाणां प्रोत्साहनराशिं दातुं अपि घोषणां कृतवान्।

**शहीदेभ्यः नमनम्**

अस्मिन् अवसरे उपमुख्यमन्त्री क्षेत्रस्य वीरशहीदानां परिवाराणां सत्कारं कृत्वा तान् नमस्कृतवान्। सः बीटन-ग्रामस्य अमरबलिदानी शहीद कुलविन्दरः, शहीद रमेशलालः, शहीद बूटासिंहः, शहीद हरदयालसिंहः तथा शहीद परमजीतसिंहः इत्येतेषां वीरपुरुषाणां परिजनैः सह मिलित्वा तान् सम्मानितवान्। क्लब-अध्यक्षः विजय बाबा महोदयः अवदत् यत् ११ फरवरीतः १४ फरवरी पर्यन्तं आयोजितायाम् अस्याम् 'ऑल ओवर इण्डिया' क्रिकेट-प्रतियोगितायां देशभरतः ४२ दलाः (Teams) भागं गृहीतवन्तः। विजेतादलाय (Winner Team) २ लक्षरूप्यकाणां नकदराशिः प्रदत्ता, उत्कृष्टप्रदर्शनकर्तृभ्यः क्रीडाकरेभ्यः च ट्रेक्टर-बाइक- इत्यादिभिः आकर्षकपुरस्कारैः सम्मानः कृतः।

# गग्गल-क्षेत्रस्य डॉ. मनु शर्मा हिमाचलस्य प्रथमा महिला 'रेटिना गोल्ड मेडलिस्ट' (स्वर्णपदकविजेत्री) जाता



**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेशस्य काङ्ग्ड़ा-जनपदस्य गग्गल- निवासिनी डॉ. मनुशर्मा राज्यस्य प्रथमा महिला 'रेटिना विशेषज्ञा' (Retina Specialist) अभवत्, या स्वकीयाभ्यः उत्कृष्ट- शैक्षणिक- व्यावसायिक- उपलब्धिभ्यः राष्ट्रिय- अन्ताराष्ट्रीयस्तरे च सम्मानं प्राप्तवती। डॉ. शर्मा 'विट्रियोरेटिनल सर्जरी' (Vitreoretinal Surgery) इत्यस्याः उपविशेषतायाः कृते 'ऑल इण्डिया ऑप्थल्मोलॉजिकल सोसाइटी' (AIOS) इत्यस्याः फेलोशिप-परीक्षायाम् उत्तीर्णा भूत्वा स्वर्णपदकं विजितवती। सम्प्रति सा पी. जी. आई. (PGIMER) चण्डीगढ़ इत्यत्र 'विट्रियोरेटिनल सर्जरी' विषये 'एम. सी. एच.' (MCh) पाठ्यक्रमस्य अध्ययनं कुर्वती अस्ति।ए. आई. ओ. एस. (AIOS) पक्षतः १ फरवरी दिनाङ्के नवदेहलीनगरे दीक्षान्तसमारोहः आयोजितः। अस्मिन् अवसरे भारतस्य पूर्व-मुख्यन्यायाधीशः न्यायमूर्तिः डी..वाई. चन्द्रचूड़ः मुख्यतिथिरूपेण उपस्थितः आसीत्, तेन च डॉ. शर्मा महोदयायै 'स्वर्णपदकं' तथा 'फेलोशिप- प्रमाणपत्रं' च प्रदत्तम्। अस्मिन् कार्यक्रमे देशस्य प्रख्याताः नेत्ररोगविशेषज्ञाः, यथा डॉ. ललित वर्मा, डॉ. पार्थ बिस्वासः, डॉ. सन्तोष होनावरः च उपस्थिताः आसन्।

## अन्ताराष्ट्रीय-उपलब्धिः-

स्वर्णपदकेन सहैव डॉ. शर्मा महोदया ५-६ फरवरी दिनाङ्के हाङ्काङ्गे 'एशिया-प्रशान्त नेत्रविज्ञान अकादमी' (APAO) पक्षतः आयोजिते सम्मेलने 'बेस्ट फोटो' प्रतियोगितायां प्रथमस्थानं प्राप्य अन्ताराष्ट्रीयस्तरे अपि प्रदेशस्य नाम प्रकाशितवती।

## प्रदेशाय सङ्कल्पः

डॉ. मनुशर्मा हिमाचलप्रदेशस्य प्रथमा महिला 'रेटिना गोल्ड मेडलिस्ट' भूत्वा गौरवम् अर्जितवती, येन सम्पूर्णे प्रदेशे हर्षस्य वातावरणं वर्तते। स्वकीये सम्बोधने सा अवदत् यत् शिक्षासमाप्त्यनन्तरं सा हिमाचलप्रदेशे एव स्वसेवाः प्रदास्यति तथा च प्रदेशस्य नेत्रचिकित्सा-क्षेत्रं सुदृढं कर्तुं स्वयोगदानं करिष्यति।

# हिमाचलप्रदेशे एच. आर. टी. सी. बसयाने प्रथमवारं महिला- चालिका- परिचालिका सीमाया हस्ते नियन्त्रकचक्रं, मीनू शर्माद्वारा यात्रापत्रक-वितरणम्




**हिमसंस्कृतवार्ताः- मण्डी।** हिमाचलप्रदेशे महिलाः अपि सर्वेषु क्षेत्रेषु पुरुषेभ्यः न पृष्ठतः इति दृष्टान्तः प्रातः ८ वादने मण्डी अन्तर्राज्यीय- बसस्थानके दृष्टः। प्रथमवारं हिमाचल पथ परिवहन निगम (एच. आर. टी. सी.) इत्यस्य बसयाने चालिका-परिचालिकारूपेण द्वे महिले समं कर्तव्यं निर्वहितवत्यौ। चालिका सीमा ठाकुर, परिचालिका मीनूशर्मा इत्येतयोः युग्लं दृष्ट्वा बसयाने उपविष्टाः यात्रिकाः अपि विस्मिताः अभवन्।

सीमा ठाकुर हिमाचलस्य प्रथम- महिला- बस- चालिका इति ख्याता अस्ति। सा डी. ए. वी. विद्यालये प्राथमिक-शिक्षां समाप्य शिमलायां स्थिते कोटशेरा- महाविद्यालये स्नातकपदवीं (बी. ए.) प्राप्तवती, अनन्तरं आङ्ग्ल-भाषायां परास्नातक- पदवीं (एम.ए.) अपि अलभत। २०१६ तमे वर्षे शिमला- स्थानीय- एकके चालिकारूपेण सेवां प्रारब्धवती। अद्यत्वे सा मण्डी-बस-डिपो-केन्द्रे चालिकारूपेण कार्यं करोति। सा सोलन- जिलान्तर्गत- अर्की- तहसीलस्य दुधाना-ग्रामस्य निवासिनी अस्ति। तस्याः पिता अपि बस-चालकः आसीत्। एतत् प्रथमवारं यदा उभे महिलये चालिका-परिचालिकारूपेण एकस्मिन् बसयाने आरूढे अभवताम्। प्रातः ८ वादने बस-स्थानकात् निर्गत्य प्रायः ८:४५ वादने बल्ह- घाटीस्थित- राजगढ़-।ग्रामं बसयानं आगतम्, ततः १० वादने पुनः मण्डी- बसस्थानके प्रत्यागता। मण्डीनगरस्य लोअर- समखेतर- क्षेत्रस्थित- खुआरानी-प्रदेशस्य निवासिनी परिचालिका मीनूशर्मा उक्तवती यत् सा गतद्विवर्षात् परिचालिकारूपेण सेवां प्रददाति। शुक्रवासरे तस्याः नियुक्तिः राजगढ़मार्गे आसीत्, यदा चालिका सीमाठाकुरस्य नियुक्तिः सकरोहामार्गे निश्चिताऽभवत्। किन्तु सीमाठाकुर स्वयमेव बस-स्थानक-प्रभारिणं प्रति निवेदनं कृतवती यत् मीनूशर्मायाः नियुक्तिः तया सह राजगढ़मार्गे भवेत्। बस-स्थानकप्रभारिणा तत् निवेदनं स्वीकृतम्।

# गैलेकटिका- अन्तरिक्षयात्राः छात्रैः प्रदर्शिता विज्ञानसृजनशीलता





**हिमसंस्कृतवार्ताः- कुणाल कौशिक मोतिहारी ।** जी. डी. गोयनका पब्लिक विद्यालये छात्रनेतृत्वेन आयोजितः अन्तरिक्ष- खगोलविज्ञान-प्रदर्शनोत्सवः अत्यन्तं प्रेरणादायकः अभवत्। अस्मिन् कार्यक्रमे छात्रवैज्ञानिकाः स्वकीयम् अनुसन्धानम्, नवोन्मेषं, सृजनशीलतां च उत्कृष्टतया प्रदर्शितवन्तः। प्रदर्शने जेम्सवेब अन्तरिक्ष-दूरदर्शी- आदर्शः, गगनयान-परियोजना, सैटर्न-V रॉकेट-प्रतिरूपम्, कृष्णविवरस्य अवधारणा, मङ्गलगृह- निर्माण-कल्पना, चन्द्रे सौम्यावतरण-प्रदर्शनं, जलरॉकेटप्रयोगः इत्यादीनि मुख्याकर्षणानि आसन्। एतेषां माध्यमेन सुदृढम् अन्तरिक्षशिक्षणम् अनुभवाधारिताध्ययनं च प्रकाशितम्। छात्राः आत्मविश्वासेन उपग्रहसञ्चारः, सूर्यझंझावाताः, विश्वोत्पत्तिविकासः, पृथिव्याः चुम्बकीयक्षेत्रम् इत्यादीन् उन्नतान् विषयान् व्याख्यातवन्तः। अभिभावकाः छात्राणां ज्ञानम्, आत्मविश्वासम्, वैश्विकदृष्टिं च प्रशंसन्तः विद्यालयस्य भाविवैज्ञानिकनिर्माणे योगदानं विशेषतया सराहनीयम् इति अभ्यनन्दन्।

# "यायावरीयरीत्या शिष्याणां वर्गीकरणम्"

लोके त्रिविधा शिष्याः दृश्यन्ते- इति राजशेखरः चतुर्थे अध्याये कथितवान्।

{१} बुद्धिमान् {२} आहार्यबुद्धि {३} दुर्बुद्धिश्च।

(१) बुद्धिमान्- स्वभावादेव यस्य बुद्धिः शास्त्रम् अनुधावति सः बुद्धिमान् शिष्यः।

बुद्धिमान् शिष्यः श्रोतुमभिलषति, श्रृणोति, विजानाति च, धारणं करोति, मननं करोति तत्र नवीनाः शङ्काः करोति। तत्समाधानं कुरुते अन्ते तत्वज्ञानां ज्ञानं प्राप्नोति।

(२) आहार्यबुद्धि- यस्य बुद्धिं शास्त्राभ्यासः संस्कुरुते असौ आहार्यबुद्धिरुच्यते। बुद्धिः त्रिधा भवति- [१] स्मृति [२] मतिः [३] प्रज्ञा।

[१] स्मृतिबुद्धिः- सा कथ्यते या विगतानुभूतविषयान् स्मारयति।

[२] मतिः-- वर्तमान् विषयाणां मननकारयित्री मतिः। वर्तमानार्थस्य मननकर्त्री मतिः।

[३] प्रज्ञाबुद्धिः- प्रज्ञानामधेया तृतीया बुद्धिः साऽस्ति या भावि- अर्थानां प्रज्ञानं कारयति **अनागतस्य प्रज्ञात्रीप्रज्ञेति।** अतः स्पष्टमस्ति यदेताः तिस्र एव बुद्धयः कवेः कृते उपकारिकाः अनिवार्यश्च सन्ति।

आहार्यबुद्धिः शिष्येऽपि त्रिधा बुद्धिः वर्तन्ते; किन्तु सः पदे- पदे पथ प्रदर्शकस्य शिक्षकस्य सहाय्यमपेक्षते। सद्गुणे उपासनम् उभयोः प्रकृष्टो गुणः।

(३) दुर्बुद्धिः- बुद्धिमदाहार्यबुद्धिभ्यां विपरितमतिः शिष्यः दुर्बुद्धिरित्युच्यते। तेषु त्रिविधेषु शिष्येषु बुद्धिमत्तः प्रतिपत्तिः सकृदुक्तस्यार्थस्य ज्ञानं समर्था। आहार्यबुद्धेस्तु अप्रतिपत्तिः सन्देहश्च द्वितियं तिष्ठति। अत एव स शङ्काम् अपनेतुं गुरुन् सेवेत। तृतीय प्रकारस्य दुर्बुद्धेः शिष्यस्य विषयेषु सर्वत्र बुद्धिविभ्रमः एव। स तु दुर्बुद्धिप्रभावात् उचितानुचितं ज्ञातुं न शक्नोति। तथापि यदि सारस्वतेयः प्रसादः तं दुर्बुद्धिं प्रसादयति, तर्हि सोऽपि कविर्भवितुं शक्नोति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# जयजलाराम-आयुर्वेद-महाविद्यालये, शिवपुरी-गोधरा-नगरे महाशिवरात्रि-महोत्सवस्य भव्य-आयोजनम्




**हिमसंस्कृतवार्ता।** जयजलाराम-आयुर्वेद-महाविद्यालये शिवपुरी-गोधरा-नगरे संस्कृत-क्लब तथा संहिता-सिद्धान्त-संस्कृत-विभागस्य संयुक्त-तत्त्वावधानेन महाशिवरात्रि-महोत्सवः श्रद्धा-भक्ति-समन्वितः सम्यक् आयोजितः। अस्मिन् पावने अवसरि BAMS-प्रथम-वर्षीय-विद्यार्थिनः विशेष-उत्साहेन सहभागित्वं कृतवन्तः।कार्यक्रमस्य शुभारम्भः दीप-प्रज्वलनेन अभवत्। ततः धन्वन्तरि-वन्दना, शिव-स्तुतिः च भक्तिभावपूर्वकं गीता। विद्यार्थिभिः मृत्तिकया निर्मितस्य पार्थेश्वर-शिवलिङ्गस्य विधिपूर्वकं पूजनम् सम्पन्नम्। विविधैः पवित्र-द्रव्यैः अभिषेकः कृतः, बिल्वपत्रैः, पुष्पैः, अन्यैः पूजन-सामग्रीभिः च अर्चनं सम्यक् सम्पन्नम्। विशेषरूपेण १००१-शिव-माहेश्वर-सूत्राणां जपेन सह अभिषेक-पूजनम् अभवत्। BAMS-प्रथम-वर्षीय-विद्यार्थिना राज-वरिया-महोदयेन महाशिवरात्रेः आध्यात्मिकं, वैदिकं, शास्त्रीयं च महत्वं विषयीकृत्य सारगर्भितं व्याख्यानं प्रस्तुतम्।अस्मिन् शुभ-अवसरे महाविद्यालयस्य ट्रस्टी-श्री पी.एम. पटेल-महोदयः ससन्मानम् उपस्थितः आसीत्।तथा अधोलिखिताः आचार्याः कार्यक्रमे उपस्थिता आसन् —डॉ.संजय-कामले,डॉ.विशाल-गोमे,डॉ.पार्थ-महोदयः, डॉ.सनीता-महोदया,डॉ.अञ्जली-महोदया, डॉ.स्वाति-महोदया,डॉ.बंसरि-महोदया, डॉ.अक्षया-महोदया,डॉ.रवीना-महोदया, डॉ.राधा-महोदया,डॉ. दीपाल-महोदया, डॉ.संदीप-महोदयः विशेष महत्व दत्ता। पूजन-कार्यं डॉ. चिराग-पुरोहित-महोदयेन विधिवत् सम्पन्नम्। कार्यक्रमस्य सुशोभनं संचालनं विवेक-यादव-महोदयेन तथा हनी-राणा-महोदयेन कौशलपूर्वकं कृतम्। BAMS-प्रथम-वर्षीय-विद्यार्थिभिः सर्वाः व्यवस्थाः उत्कृष्टतया निर्वाहिताः।अन्ते सर्वैः सामूहिक-आरती कृता, प्रसाद-वितरणं च सम्पन्नम्।एवं भक्तिमय-आध्यात्मिक-वातावरणे महोत्सवः सफलतया समापितः।

# गौरी-वटुक-संवादः (संस्कृतगीतम्)

यस्मै त्वं तपसि हे गौरि! कुरूपः खलु सः।
सत्यं त्वन्न जानासि रे वटुक! अतः शिवनिन्दकः॥

**१. (वटुकः)**
तस्य कण्ठे विषधरमाला, श्मशानं तु निवासशाला।
कङ्कणं हस्ते वासुकिः हे गौरि! त्रिनेत्रः सः॥
यस्मै त्वं तपसि हे गौरि! कुरूपः खलु सः।

**२. (वटुकः)**
तस्य कुलस्य न किञ्चिज्ज्ञानं, रक्तरञ्जितं गजपरिधानम्।
चिताभस्म त्वङ्गरागः गौरि! विकरालः सः॥
यस्मै त्वं तपसि हे गौरि! कुरूपः खलु सः।

**३. (वटुकः)**
भूतगणास्तं परिभ्रमन्ति उच्चैरुच्चैः चीत्कुर्वन्ति।
वृद्धो नन्दी तस्य यानं गौरि! कण्ठे गरलः।।
यस्मै त्वं तपसि हे गौरि! कुरूपः खलु सः।

**४. (पार्वती)**
(यदा) चिताभस्म शिवसर्गे आयाति, पावनतां तत्तदा प्रयाति ।
लेपयन्ति ललाटे देवाः रे वटुक! मङ्गलकर्ता सः॥
सत्यं त्वन्न जानासि रे वटुक! अतः शिवनिन्दकः॥

**५. (पार्वती)**
शिवस्त्रयाणां लोकानां स्वामी,
जानाति सर्वं सोऽन्तर्यामी
तपसा भवति ज्ञानं वटुक! हेतुर्जगतः सः।
सत्यं त्वन्न जानासि रे वटुक! अतः शिवनिन्दकः॥

**६. (विजया)**
गौर्याः मनः प्रसन्नं जातं,
यदा साक्षात् शिवदर्शनं जातम्
वदति जयभगवान् शास्त्री, सुरूपः खलु सः।।
सत्यं त्वन्न जानासि रे वटुक! अतः शिवनिन्दकः॥
यस्मै त्वं तपसि हे गौरि! कुरूपः खलु सः।
सत्यं त्वन्न जानासि रे वटुक!
अतः शिवनिन्दकः॥

**लेखकः- पं० जय भगवान्**
**शास्त्री, कैथल (हरियाणा) संस्कृताध्यापकः**
**सम्पर्कसूत्रम् - 9991829095**
**इदं गीतं JM SHASTRI BIRLA**
**इति यूट्यूबचैनले उपलब्धम्।**